# Shri Balashtottarashatanama Stotram 4

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ४

## Document Information

Text title : bAlAShTottarashatanAmastotram 4

File name : bAlAShTottarashatanAmastotram4.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Balasaparya

Latest update : August 23, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ४

अगस्त्य उवाच-
हयग्रीव दयासिन्धो भगवन्भक्तवत्सल ।
बालात्रिपुरसुन्दर्या नाम्नामष्टोत्तरं शुभम् ॥

वदस्व मे त्वं कृपया येन ज्ञानं प्रवर्तते ॥ १
हयग्रीव उवाच -
शृणु सम्यक्प्रवक्ष्यामि श्रीबालाष्टोत्तरं शतम् ।
सर्वविद्यात्मकं ज्ञेयं श्रीबालाप्रीतिदायकम् ॥ २
अस्य श्रीबालाष्टोत्तरशतनामस्तोत्रमहामन्त्रस्य दक्षिणामूर्तिः ऋषिः ।
अनुष्टुप् छन्दः । बालात्रिपुरसुन्दरी देवता ।
ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् ।
श्रीबालाप्रित्यर्थे नामपारायणे विनियोगः ।
मूलेन कराङ्गन्यासौ ।

ध्यानं -
उदञ्चद्दिनेशप्रपञ्च प्रकाशां
उदूढेन्दुरे खामुदारां त्रिणेत्राम् ।
वहन्तीं वराभीतिकोशाक्षमालाः
वहन्तीं स्फुटे हल्लके नौमि बालाम् ॥ १ var १ मालासृणीपुस्तकपाशहस्तां बालां
भजेऽहं ललितां कुमारीम् ।
लमित्यादि पञ्च पूजाः ।
(कुमारकामेश्वरकेलिलोलां नमामि गौरीं नववर्षदेश्याम् ॥)

कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सौन्दर्यभाग्यसंयुक्ता क्लीङ्कारी सर्वमङ्गला ॥ २ ३ var २ सुन्दरी सर्वसौभाग्यवती
ह्रीङ्काररूपिणी ।

ऐङ्कारी सर्वजननी३ परा पञ्चदशाक्षरी । ( var ३ स्कन्दजननी क्लीङ्कारी परमेश्वरी ।
त्रैलोक्यमोहनाधीशा सर्वाशापूरवल्लभा ॥ ४ (सौःकारी सर्वशक्तिश्च परा पञ्चदशाक्षरी ॥
सर्वसङ्क्षोभणाधीशा सर्वसौभाग्यदायिनी ।
सर्वार्थसाधकाधीशा सर्वरक्षाकराधिपा ॥ ५
सर्वरोगहराधीशा सर्वसिद्धिप्रदायिका ।
सर्वानन्दमयाधीशा योगिनीचक्रनायिका ॥ ६
भक्तानुरक्ता४ रक्ताङ्गी शङ्करार्धशरीरिणी । var ४ भक्तानुरक्षा
पुष्पबाणेक्षुकोदण्डपाशाङ्कुशलसत्करा ॥ ५ ७ var ५ पुष्पबाणैक्षवधनुःपाशाङ्कुशलसत्करा ।
संविदानन्दलहरी६ श्रीविद्या त्रिपुरेश्वरी । var ६ सच्चिदानन्दलहरी
सर्वसङ्क्षोभिणीपूर्वनवमुद्रेश्वरी शिवा७॥ ८ var ७ पूर्वा चानन्तमुद्रेशी सर्वसङ्क्षोभिणी शिवा ।
अनङ्गकुसुमाराध्या चक्रेशी८ भुवनेश्वरी । var ८ अनङ्गकुसुमापीडा चक्रिणी
गुप्ता गुप्ततरा नित्या नित्यक्लिन्ना मदद्रवा९॥ ९ var ९ नित्यक्लिन्नमदद्रवा
मोहिनी परमानन्दा कामेशी तरुणी कला ।
पद्मावती१० भगवती पद्मरागकिरीटिनी ॥ १० var कलावती१०
रक्तवस्त्रा रक्तभूषा रक्तगन्धानुलेपना ।
सौगन्धिकमिलद्वेणी मन्त्रिणी मन्त्ररूपिणी ॥ ११
तत्त्वासना११ तत्त्वमयी सिद्धान्तःपुरवासिनी । var तत्त्वत्रया११
श्रीमती च महादेवी कौलिनी परदेवता ॥ १२
कैवल्यरेखा वशिनी १२सर्वेशी सप्तमातृका । var सर्वमातृका सर्वमङ्गला१२
विष्णुस्वसा वेदवेद्या१३ सर्वसम्पत्प्रदायिनी ॥ १३ var १३वेदमयी देवमाता
किङ्करीभूत१४गीर्वाणी सुधापानविनोदिनी । var १४श्रीवाणी
१५आधारपीठनिलया स्वाधिष्ठानसमाश्रया ॥ १४ var १५आधारवीथिपथिका
मणिपूरसमासीना चानाहतनिवासिनी ।
१६आज्ञाचक्राब्जनिलया १७विशुद्धिस्थलसंश्रया ॥ १५ var १६आज्ञापद्मासनासीना
१७विशुद्धचक्रनिलया चाज्ञाचक्रनिवासिनी
अष्टात्रिंशत्कलामूर्तिः १८सुषुम्नाद्वारमध्यगा । var १८सुषुम्नागारमध्यगा
योगीश्वरमनोध्येया१९ परब्रह्मस्वरूपिणी ॥ १६ var योगीश्वरमनोध्येया१९
चतुर्भुजा चन्द्रचूडा पुराणागमरूपिणी ।

ओङ्कारी विविधाकारा पञ्चब्रह्मस्वरूपिणी२०॥ १७ var ओङ्कारी विमला विद्या पञ्चप्रणवरूपिणी२०
भूतेश्वरी भूतमयी पञ्चाशत्पीठरूपिणी२१। var पञ्चाशद्वर्णरूपिणी२१
षोढान्यासमहाभूषा कामाक्षी दशमातृका ॥ १८
आधारवीथीपथिका२२ लक्ष्मीस्त्रिपुरभैरवी । var आधारशक्तिररुणा२२
रहःपूजासमालोला रहोयज्ञस्वरूपिणी ॥ १९
त्रिकोणमध्यनिलया षट्कोणपुरवासिनी ।
वसुकोणपुरावासा २३दशारद्वयवासिनी ॥ २० var २३दशारद्वन्द्व
चतुर्दशारकोणस्था वसुपत्रनिवासिनी ।
२४स्वराब्जपत्रनिलया वृत्तत्रयनिवासिनीः ॥ २१ var २४स्वराब्जचक्र
चतुरश्रस्वरूपा च बिन्दुस्थलमनोहरा२५। var बिन्दुस्थलनिवासिनी२५
नाम्नामष्टोत्तरशतं भवेद्देव्याः समन्त्रकम् ॥ २२
प्रत्यहं पूजयेद्बालां श्रद्धाभक्तिसमन्वितः ।
अर्चयेत्कुङ्कुमेनैव जातीचम्पकपङ्कजैः ॥ २३
अन्यैः सुगन्धिकुसुमैः केतकीकरवीरकैः ।
योऽर्चयेत्परया भक्त्या स लभेद्वाञ्छितं फलम् ।
भक्त्या नित्यं पठेत्सम्यग्वागीश्वरसमो भवेत् ॥ २४

इति श्रीबालाष्टोत्तरशतनामस्तोत्रं (४) सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Balashtottarashatanama Stotram 4*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*